Roll No.					

S.Y.J.C.(XII) ARTS/COMMERCE/SCIENCE

Terminal/Oct. 24 | **SANSKRIT** | **50 Marks / 2 ½ Hrs**

संस्कृतम् – कृतिपत्रिका

सूचनाः

(१) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।
(२) यथासूचनम् आकलनकृतयः व्याकरणकृतयः च आरेखितव्याः।
(३) आकृतीनाम् आलेखनं मसिलेखन्या कर्तव्यम्।
(४) रिक्तस्थानपूरणे युज्यमानाः शब्दाः अधोरेखितव्याः।

प्रथमः विभागः – सुगमसंस्कृतम् । (०६)

प्र.क्र. १ अ) चिन्हानाम् अर्थम् लिखत ।

(०३)



प्र.क्र १ आ व्यावहारिकशब्दमञ्जूषायाः शब्दान् चित्वा उचित स्तम्भे लिखित (०३)

शिक्षणम्	कला	नाट्यम्

(ज्ञानरचनावादः, पणवः, सूपकर्म, मञ्चसज्जा, लक्ष्यवेधनम्, संहिता, हस्तलाघवम्,

दुरस्थ- शिक्षणम्)

द्वितीयः विभागः – पद्यम् ।

प्र. २. अ) पद्यांशः पठित्वा निर्दिष्टा कृतीः कुरुत।

अवबोधनम् (३ तः २)

१) उचितं कारणं चित्वा वाक्यं पुनर्लिखत।

बकाः मानसजलाशयाय न स्पृहयन्ति, यतः .....।

अ. तत्र वातावरणं सुन्दरं नास्ति ।

आ. तत्र शम्बूकाः न सन्ति ।

२. वाक्यं पुनर्लिखित्वा सत्यम्/ असत्यं लिखत ।

कृष्णेन नवनीतं भक्षितम् ।

३. पूर्णवाक्येन उत्तरं लिखत।

कीदृशः चन्द्रचूडः वः पातु ?

कृष्णेनाम्ब गतेन रन्तुमधुना मृद् भक्षिता स्वेच्छया
सत्यं कृष्ण क एवमाह मुसली मिथ्याम्ब पश्याननम् ।
व्यादेहीति विकासितेऽथ वदने दृष्ट्वा समस्तं जगद्
माता यस्य जगाम विस्मयवशं पायात्स वः केशवः ।।१।।
(शार्दूलविक्रीडितम्)

कस्त्वं? शूली मृगय भिषजं नीलकण्ठः प्रियेऽहं
केकामेकां कुरु पशुपतिर्नैव दृश्ये विषाणे ।
स्थाणुर्मुग्धे न वदति तरुर्जीवितेशः शिवायाः
गच्छाटव्यामिति हतवचाः पातु वश्चन्द्रचूडः ।।२।।

कस्त्वं लोहितलोचनास्यचरणो हंसः कुतो मानसात् ।
किं तत्रास्ति सुवर्णपङ्कजवनान्यम्भः सुधासन्निभम् ।
रत्नानां निचयः प्रवालमणयो वैदूर्यरोहाः क्वचित्
शम्बूका अपि सन्ति? नेति च बकैराकर्ण्य हीहीकृतम् ।।३।।

प्र. २ अ.

पृथक्करणं कुरुत ।

जालरेखाचित्रं पूरयत ।



प्र. २ ब. १. पद्यांशः पठित्वा निर्दिष्टा कृतीः कुरुत । (०४)

अवबोधनम् (३ तः २) (०२)

१. उचितं वाक्यांशं चित्वा वाक्यानि पुनर्लिखत ।

विजयादशम्यां – ----------

अ) गणेशपूजामहोत्सवः प्रवर्तते ।

ब) वाजिविभूषणं प्रवर्तते ।

२. पूर्णवाक्येन उत्तरं लिखत ।

कस्यां तिथौ गणेशपूजामहोत्सवः प्रवर्तते ?

३. रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत ।

सिद्धिविनायकस्य पूजामहोत्सवः भाद्रपदमासे प्रवर्तते।

संवत्सरारम्भदिने प्रभाते सर्वे ध्वजारोपणमाद्रियन्ते ।
वितन्वते यत्र जनाः प्रमोदाद्दोलोत्सवं सद्मनि चैत्रगौर्याः ।।

पक्षे सिते भाद्रपदे च मासे गृहे गृहे यत्र तिथौ चतुर्थ्याम् ।
प्रवर्तते मृण्मयमूर्तिपूजामहोत्सवः सिद्धिविनायकस्य ।।

निर्वर्त्य पूजाविधिमायुधानां नीराजनं वाजिविभूषणं च ।
व्रजन्ति सायं विजयादशम्यां सीमानमुल्लङ्घितुमत्र लोकाः ।।

वृषोत्सवः श्रावणमासि यत्र कोजागरी शारदपौर्णिमायाम् ।
सम्पद्यमानस्त्रिपुरस्य दाहो विशिष्यते कार्तिकपौर्णमास्याम् ।।

शब्दज्ञानम् । (३ तः २) (०२)

१. विशेषण –विशेष्याणां मेलनं कुरुत । (०२)

अ.	आ
चतुर्थ्याम्	सिते

पक्षे तिथौ

मासे

२. षष्ठी-विभक्त्यन्तपदे परिच्छेदत: चित्वा लिखत ।

३. सन्धिविग्रहं कुरुत - पूजाविधिमायुधानाम् - ------------ + --------- ।

प्र.२ क पद्यांशस्य अन्वयपूर्तिं कुरुत \ माध्यमभाषया सरलार्थं लिखत।

पथ्ये सति गदार्तस्य भेषजग्रहणेन किम् ।
पथ्येऽसति गदार्तस्य भेषजग्रहणेन किम् ।।४।।
(अनुष्टुप्)

चिन्तनीया हि विपदामादावेव प्रतिक्रिया ।
न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ।।५।।

तृतीय: विभाग: - गद्यम् ।

प्र. ३ अ गद्यांशः पठित्वा निर्दिष्टा कृती: कुरुत । (०४)

अवबोधनम् (३ तः २)

१. उचितं वाक्यांशं चित्वा वाक्यं पुनर्लिखत । (०२)

१) उचिताहार-निद्रा-जलपान-व्यायामादिकैः - .... ।
अ) बाह्यप्रसाधनं साध्यम् ।
ब) आन्तरिकप्रसाधनं साध्यम् ।

उचितं शब्दं चित्वा चतुष्कोणं पूरयत ।

प्रसाधनकलाया: षोडश-अङ्गेषु एकम् - [ ]

२. पूर्णवाक्येन उत्तरं लिखत ।

विलेपनेन किं भवति ?

याः चतुष्षष्टिकलाः सुविदिताः, तास्वपि नैकाः प्रसाधनकलाः निर्दिष्टाः। मर्दनं, विलेपनं, केशभूषा, माल्यभूषा, परिधेयं, गन्धयुक्तिः, अलङ्करणम् इत्यादीनि प्रसाधनकलायाः षोडश अङ्गानि सन्ति ।

प्रसाधनस्य द्वौ विभागौ-आन्तरिकप्रसाधनं तथा बाह्यप्रसाधनम् । शरीरस्य निरामयत्वं नाम आन्तरिकप्रसाधनम्। तद् उचिताहार-निद्रा-जलपान-व्यायामादिकैः अवश्यमेव साध्यम् । तदनन्तरमेव बाह्यप्रसाधनानाम् उपयोजनं कर्तव्यम् । दन्तधावनं, केशसम्मार्जनं, स्नानं तथा विलेपनं प्रतिदिनं करणीयम् इति उचितमेव उपदिष्टं प्राचीनैः। स्नानार्थं फेनकं तथा वनौषधियुतानि चूर्णकानि उपलब्धानि । विलेपनेन त्वक् उज्ज्वला मृदुतरा च भवति, तथा दुर्गन्धनाशनमपि शक्यम् । ऋतुम् अनुसृत्य प्रसाधनं करणीयम् इत्यपि सूचितम्, यथा ग्रीष्मकाले चन्दनविलेपनम्, कार्पासवस्त्रपरिधानम्, मौक्तिकमालाधारणं च योग्यम्। शिशिरे ऊर्णावस्त्रं, कृष्णागरुधूपनं तथा कुङ्कुममण्डनम् उपयुक्तम् ।

चित्रशिल्पेषु नैकविधाः प्रसाधनपराः जनाः दृश्यन्ते। तथा उत्खननेषु अपि प्राचीनानि प्रसाधनसाधनानि प्राप्तानि। अनेन सुष्ठु ज्ञायते यद् अतिप्राचीनकालादेव भारते न केवलं स्त्रियः, किन्तु पुरुषाः अपि प्रसाधनकलायां निपुणाः। तदर्थं विविधप्रसाधनसाहित्यस्य प्रभूतम् उपयोजनं भारतीयाः कृतवन्तः।

शब्दज्ञानम् (३ तः २)

(०२)

१. सर्वनामस्थाने नाम/नामस्थाने सर्वनाम प्रयुज्य वाक्यं पुनर्लिखत ।
<u>प्रसाधनस्य</u> द्वौ विभागौ-आन्तरिकप्रसाधनं तथा बाह्यप्रसाधनम् । (तद्)

२. विरुद्धार्थकशब्दं परिच्छेदतः चित्वा लिखत ।
अल्पम् - ---------- , सुगन्धः - ----------

३. षष्ठी-विभक्त्यन्तपदे परिच्छेदतः चित्वा लिखत ।

अथवा

पृथक्करणम् । (०२)

मञ्जूषातः उचितं शब्दं चित्वा तालिकां पूरयत ।

ग्रीष्मऋतुः	शिशिरऋतुः

(ऊर्णावस्त्रम्, कार्पासवस्त्रपरिधानम्, कृष्णागरुधूपनम्, मौक्तिकमालाधारणम्)

चतुर्थः विभागः नाट्यकलशः ।

प्र. ४ अ) नाट्यांशः पठित्वा निर्दिष्टाः कृतीः कुरुत । ०४

अवबोधनम् - (३ तः २) ०२

उचितं वाक्यांशं चित्वा वाक्यं पुनर्लिखत।

१) सर्वदमनस्य मणिबन्धात् -

अ) रक्षाकरण्डकं परिभ्रष्टम् ।

ब) मृत्तिकामयूरः परिभ्रष्टः।

२) वाक्यं पुनर्लिखित्वा सत्यम् / असत्यं लिखत।

सञ्जीवनी नामौषधिः भगवता मारीचेन दत्ता।

३) रेखाङ्कितं पदम् आधृत्य प्रश्ननिर्माणं कुरुत ।

इदं सिंहशावकविमर्दात् परिभ्रष्टम्।

राजा - कथं चक्रवर्तिलक्षणमप्यनेन धार्यते!

द्वितीया - सुव्रते, न शक्य एष वाचामात्रेण विरमयितुम्। गच्छ त्वम्। मदीय उटजे मृत्तिकामयूरस्तिष्ठति। (तापसी) तमस्योपहर।

प्रथमा - तथा। (इति निष्क्रान्ता)

द्वितीया - (राजानमवलोक्य) भद्रमुख एहि तावत्। मोचयानेन बाध्यमानं बालमृगेन्द्रम्।

राजा - (उपगम्य, सस्मितम्) अयि भो महर्षिपुत्र।

द्वितीया - भद्रमुख, न खल्वयम् ऋषिकुमारः।

राजा - (बालकमुपलालयन्) न चेत् मुनिकुमारोऽयम्, अथ कोऽस्य व्यपदेशः?

द्वितीया - पुरुवंशः।

राजा - (आत्मगतम्) कथमेकान्वयो मम।

(प्रकाशम्) कथमस्य जननी अत्र देवगुरोः तपोवने प्रसूता?

द्वितीया	-	अप्सरस्सम्बन्धेन।
राजा	-	(अपवार्य) हन्त, द्वितीयमिद्माशाजननम्। (प्रकाशम्) अथ सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी?
द्वितीया	-	कस्तस्य धर्मदारपरित्यागिनो नाम सङ्कीर्तयितुं चिन्तयिष्यति?
राजा	-	(स्वगतम्) इयं खलु कथा मामेव लक्ष्यीकरोति। यदि तावदस्य शिशोर्मातरं नामतः पृच्छामि? अथवा अनार्थः परदारव्यवहारः।
		(प्रविश्य मृण्मयूरहस्ता ।)
प्रथमा	-	सर्वदमन, शकुन्तलावण्यं प्रेक्षस्व।
बालः	-	(सदृष्टिक्षेपम्) कुत्र वा मम माता?
राजा	-	(आत्मगतम्) किं वा शकुन्तलेत्यस्य मातुराख्या? सन्ति पुनर्नामधेयसादृश्यानि।
सर्वदमनः	-	रोचते मे एष भद्रमयूरः । (इति क्रीडनकमादत्ते ।)

प्रथमा	-	(विलोक्य सोद्वेगम्) अहो, रक्षाकरण्डकमस्य मणिबन्धे न दृश्यते।
राजा	-	अलमलमावेगेन । नन्विदमस्य सिंहशावकविमर्दात् परिभ्रष्टम् । (इत्यादातुमिच्छति ।)
उभे	-	मा खल्विदमवलम्ब्य । कथं, गृहीतमनेन ! (इति विस्मयात् उरोनिहितहस्ते परस्परमवलोकयतः।)
राजा	-	किमर्थं प्रतिषिद्धाः स्मः?
प्रथमा	-	शृणोतु महाराजः। एषाऽपराजिता नामौषधिः भवगता मारीचेन दत्ता। एतां किल मातापितरावात्मानं च वर्जयित्वा अपरो भूमिपतितां न गृह्णाति।
राजा	-	अथ गृह्णाति ।
प्रथमा	-	ततस्तं सर्पो भूत्वा दशति ।
राजा	-	भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया?
उभे	-	अनेकशः।
		(राजा सहर्षं बालं परिष्वजते ।)
सर्वदमनः	-	मुञ्च माम् । मम खलु तातो दुष्यन्तः । न त्वम् ।
राजा	-	(सस्मितम्) एष विवाद एव प्रत्याययति ।

शब्दज्ञानम् । (३ तः २) ०२

१) नामस्थाने सर्वनाम्नः योजना कुरुत ।

<u>ऋषिजनेन</u> 'सर्वदमन' इति कृतनामधेयः अस्ति । (इदम्)

२) विशेषण-विशेष्याणां मेलनं कुरुत ।

	अ	आ
1.	अपराजिता	दत्ता
2.	अनार्यः	ओषधिः
		परदारव्यवहारः

३) पूर्वकालवाचक-अव्यये पद्यांशतः चिनुत।

पञ्चमः विभागः – भारतीयविद्या

अनुप्राणितचित्रपटः - द लायन किङ्ग।

'वाल्ट-डिस्ने' नाम्न्या ------------- निर्मितस्य चित्रपटस्य पुनः प्रस्तुतिः इयम्।

मुसाफ़ा, सिम्बा, स्कार्, टैमेन्, पुम्बा, इत्यादयः पशवः ------------ वनप्रदेशे निवसन्ति। राजस्य कृते तेषां सङ्घर्षः अत्र वर्णितः।

अनुप्राणितपटेषु ------------ कौशलं तु मौलिकमेव। किन्तु, पार्श्वनिवेदकानाम् अपि ----------- अतीव महत्त्वपूर्णं भवति। यतः तेषां ---------- माध्यमेन रसिकाः कथाम् अस्वादयन्ति। आङ्गलभाषापटे, मथ्यू-ब्रोडरिक् तथा जेम्स-अर्ल्-जोन्स इति द्वौ पार्श्वनिवेदकौ। अस्य चित्रपटस्य ---------- तु विख्यातः अभिनेता शाहरुखखानः च तस्य पुत्र आर्यनखानः च ---------- कृतवन्तौ। एतदपि अस्य चित्रपटस्य ---------- लोकप्रियतायाः कारणम्।

(पार्श्वनिवेदनं, आफ़्रिकाखण्डे, तन्त्रज्ञानां, भारते, स्वराणां, कौशलम्, हिन्दीसंस्करणे, निर्मितिसंस्थया)

सप्तमः विभागः . भाषाभ्यासः

प्र. ४ अधोनिर्दिष्टा कृतीः कुरुत। (५ तः ४)

अ. नाम–तालिकां पूरयत। (५ तः ४) (०३)

अ) नाम–तालिकां पूरयत। (८ तः६) (०३)

नाम	प्रातिपदिकम्	अन्तम्	लिङ्गम्	विभक्तिः	वचनम्
भर्ता	भर्तृ	ऋकारान्तम्	पुल्लिङ्गम्	________	________
सरस्वत्याः	सरस्वती	________	________	षष्ठी	एकवचनम्
तिथौ	________	इकारान्तम्	पुल्लिङ्गम्	________	एकवचनम्

आ) **समास–तालिकां पूरयत। (५ तः ३)**

क्र.	समस्तपदम्	समासविग्रहः	समासनाम
१	________	न सन्तः	नञ् तत्पुरुषः
२	स्तुतिकन्या	________	कर्मधारयः
३	________	राक्षस्याः जायते इति	उपपद तत्पुरुषः
४	क्षीणायुः	क्षीणम् आयु. यस्य सः	________
५	लोकवीरः	लोकेषु वीरः	________
६	________	अर्थेन हीनः	तृतीया तत्पुरुषः

इ) **तद्धित–कृदन्ततानां तलिकां पूरयत। (८ तः ६)** (०३)

तद्धितम्	कृदन्तम्

(दारिद्र्यम्, भर्ता, वासः, सौभद्रः, भक्तिः, साहित्यम्, शक्तिः, भारतीयः)

ई) **समानर्थकाशब्दं लिखत। (८ तः ६)** (०३)

वस्त्रम्, सितः द्विषत्, तूलः, समुद्रः राक्षसीजः, महीरुहः, शक्तिधरः

उ) **सूचनानुसारं परिवर्तनं कुरुत। (५ तः ३)** (०३)

१) जनाः दोलोत्स्वं वितन्वते। (वाक्यं एकवचने परिवर्तय।)

२) अलं ________। ('रोदन' इति पदस्य योग्य विभक्ति लिखत।)

३) भीमः सौभद्रं स्मरति घटोत्कचं वदति च। (पूर्वकालवाचकं योजयत।)

अष्टमः विभागः – अपठितम् । (०४)

प्र.८. **संस्कृतवाक्यानां माध्यमभाषया अनुवादं कुरुत। (६ तः ४)** (०४)

१. तेन निबिडारण्ये व्याघ्रः दृष्टः ।

२. त्वं सायङ्काले सप्तवादने आगच्छ ।

३. सजीवाः प्राणवायुना जीवन्ति ।

क्रीडाङ्गणे दशछात्राः क्रीडन्ति ।

गणपतये रक्तपुष्पं रोचते ।

नृपः निर्धनेभ्यः अन्नं ददाति ।